# वैयाकरणसिद्धान्तकौमुदी

## हलन्तपुंलिङ्गप्रकरणम् (१०)

## १९.०९.२०११

# पुनरावर्तनम्

- नकारान्तः पुंलिङ्गः 'मघवन्' शब्दः
- 'मघवा बहुलम्' इति सूत्रेण तृ-आदेशः विकल्पेन ।
- तृत्वपक्षे तकारान्तवद्रूपाणि । सर्वनामस्थानेषु नुमागमः (उगिदचां ...) ।
- तृत्वाभावे नकारान्तवद्रूपाणि । सुटि राजवत् । शस्-प्रभृतिषु अजादिषु 'श्व-युव-मघोनामतद्धिते' इति संप्रसारणम् ।

- नकारान्तः पुंलिङ्गः श्वन्-शब्दः ।
- सुटि राजवत् । शस्-प्रभृतिषु अजादिषु 'श्व-युव-मघोनामतद्धिते' इति संप्रसारणम् ।

# पुनरावर्तनम्

- नकारान्तः पुंलिङ्गः 'युवन्' शब्दः ।
- सुटि राजवत् । शस्-प्रभृतिषु अजादिषु 'श्व-युव-मघोनामतद्धिते' इति संप्रसारणम् ।
- यकारस्य पुनः संप्रसारणं न, 'न संप्रसारणे संप्रसारणम्' इति निषेधात् ।

- नकारान्तः पुंलिङ्गः ‘अर्वन्’ शब्दः । अश्वपर्यायः ।
- अर्वन् (सुँ) स्
- अर्वान् स् (‘सर्वनामस्थाने चासम्बुद्धौ’ - ६.४.८ - इति उपधादीर्घः)
- अर्वान् (‘हल्ङ्याब्भ्यः...’ - ६.१.६८ - इति सुलोपः)
- अर्वा (‘नलोपः प्रातिपदिकान्तस्य’ - ८.२.७ - इति नलोपः)

- अर्वन् औ

# ३६४. अर्वणस्त्रसावनञः (६.४.१२७)

- चत्वारि पदानि । अर्वणः, तृ, असौ, अनञः ।
- 'अङ्गस्य' (६.४.१) इत् अधिक्रियते ।
- नञा रहितस्य अर्वन् इत्यस्य अङ्गस्य तृ इति अन्तादेशः स्यात्, न तु सौ ।
- उगित्त्वात् नुम् ।
- तृ इत्यत्र ऋकारः इत् । तेनायम् उगित् ।

- अर्वन्   औ
- अर्वत्   औ  ('अर्वनस्त्रसावनञः' इति तृत्वम्)
- अर्व न् त् औ ('उगिदचां सर्वनामस्थानेऽधातोः' - ७.१.७० - इति नुमागमः)
- अर्वंतौ  ('नश्चापदान्तस्य झलि' - ८.३.२४)
- अर्वन्तौ  ('अनुस्वारस्य ययि परसवर्णः' - ८.४.५८)

- अर्वन्तः ।
- अर्वन्तम्, अर्वन्तौ, अर्वतः ।
- अर्वता, अर्वद्भ्याम् इत्यादि ।

# नकारान्तः पुंलिङ्गः अर्वन्-शब्दः

सु-प्रत्ययं विहाय सर्वासु विभक्तिषु 'अर्वणस्त्रसावनञः' इति तृ-आदेशः

सर्वनामस्थाने परे 'उगिदचां सर्वनामस्थानेऽधातोः' इति नुमागमः

| | एकवचनम् | | बहुवचनम् |
|---|---|---|---|
| | अर्वा | अर्वन्तौ | अर्वन्तः |
| सम्बोधनप्रथमाविभक्तिः | हे अर्वन् | हे अर्वन्तौ | हे अर्वन्तः |
| द्वितीयाविभक्तिः | अर्वन्तम् | अर्वन्तौ | अर्वतः |
| | अर्वता | अर्वद्भ्याम् | अर्वद्भिः |
| | अर्वते | अर्वद्भ्याम् | अर्वद्भ्यः |
| | अर्वतः | अर्वद्भ्याम् | अर्वद्भ्यः |
| | अर्वतः | अर्वतोः | अर्वताम् |
| सप्तमीविभक्तिः | अर्वति | अर्वतोः | अर्वत्सु |

शस्प्रभृतिषु अजादिषु किमपि कार्यं न

शस्प्रभृतिषु हलादिषु जश्त्वम् । सुपि जश्त्वचर्त्वे ।

- अनञः किम्?
- अनर्वा यज्ववत् ।
- ‘न अर्वा’ इति नञ्-तत्पुरुषे ‘अनर्वन्’ इति प्रातिपदिकम् ।
- सुटि राजवत् ।
- शस्प्रभृतिषु ‘न संयोगाद्वमन्तात्’ इति निषेधात् न अल्लोपः ।
- यज्ववद्रूपाणि ।

- नकारान्तः पुंलिङ्गः 'पथिन्' शब्दः । मार्गपर्यायः ।
- पथिन्  (सुँ) स्

# ३६५. पथिमथ्यृभुक्षामात् (७.१.८५)

- पदद्वयम् । पथि-मथि-ऋभुक्षाम्, आत् ।
- 'सावनडुहः' (७.१.८२) इत्यतः 'सौ' इति अनुवर्तते ।
- एषाम् आकारः अन्तादेशः स्यात् सौ परे ।
- आ आत् इति प्रश्लेषेण शुद्धाया एव व्यक्तेः विधानात् न अनुनासिकः ।

- पथिन्  स्
- पथि आ स्  (पथिमथ्यृभुक्षामात्)

# ३६६. इतोऽत्सर्वनामस्थाने (७.१.८६)

- पदत्रयम् । इतः, अत्, सर्वनामस्थाने ।
- 'पथिमथ्यृभुक्षामात्' (७.१.८५) इत्यतः 'पथिमथ्यृभुक्षाम्' इति अनुवर्तते ।
- पथ्यादेः इकारस्य अकारः स्यात् सर्वनामस्थाने परे ।

- पथि आ स्
- पथ् अ  आ  स्  ('इतोऽत्सर्वनामस्थाने')

# ३६७. थो न्थः (७.१.८७)

- पदद्वयम् । थः, न्थः ।
- 'पथिमथ्यृभुक्षामात्' (७.१.८५) इत्यतः 'पथिमथ्यृभुक्षाम्' इति अनुवर्तते ।
- पथिमथोः थस्य न्थादेशः स्यात् सर्वनामस्थाने परे ।

- पथ् अ आ स्
- पन्थ् अ आ स् (थो न्थः)

- पथिन्  (सुँ) स्
- पथि आ    स्('पथिमथ्यृभुक्षामात्' - ७.१.८५ - इति आकारः अन्तादेशः)
- पथ् अ आ  स्  ('इतोऽत्सर्वनामस्थाने' - ७.१.८६ - इति इकारस्य अकारः)
- पन्थ् अ आ स्  ('थो न्थः' - ७.१.८७ - इति थकारस्य न्थादेशः)
- पन्थास्       ('अकः सवर्णे दीर्घः' - ६.१.१०१)
- पन्थार्       ('ससजुषो रुः' - ८.२.६६)
- पन्थाः       ('खरवसानयोर्विसर्जनीयः' - ८.३.१५)

- पथिन्  औ
- पथन्   औ  (‘इतोऽत्सर्वनामस्थाने’ - ७.१.८६ - इति इकारस्य अकारः)
- पन्थन्  औ  (‘थो न्थः’ - ७.१.८७ - इति थकारस्य न्थादेशः)
- पन्थानौ      (‘सर्वनामस्थाने चासम्बुद्धौ’ - ६.४.८ - इति उपधादीर्घः)

- पन्थानः ।
- पन्थानम्, पन्थानौ ।



- पथिन् (शस्) अस्

# ३६८. भस्य टेर्लोपः (७.१.८८)

- पदत्रयम् । भस्य, टेः, लोपः ।
- ‘पथिमथ्यृभुक्षामात्’ (७.१.८५) इत्यतः ‘पथिमथ्यृभुक्षाम्’ इति अनुवर्तते ।
- भसंज्ञकस्य पथ्यादेः टेः लोपः स्यात् ।

- पथिन्  अस्
- पथ्      अस्  (‘भस्य टेर्लोपः’ - ७.१.८८)
- पथर्
- पथः

- पथा, पथिभ्याम् इत्यादि ।

# नकारान्तः पुंलिङ्गः पथिन्-शब्दः

सर्वनामस्थाने परे 'इतोऽत्सर्वनामस्थाने' इति इकारस्य अकारः, 'थो न्थः'

सौ 'पथिमथ्यृभुक्षामात्' इति आकारोऽन्तादेशः । इकारस्य अकारः, थो न्थः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | पन्थाः | पन्थानौ | पन्थानः |
| क्तिः | हे पन्थाः | हे पन्थानौ | हे पन्थानः |
| द्वितीयाविभक्तिः | पन्थानम् | पन्थानौ | पथः |
| | पथा | पथिभ्याम् | पथिभिः |
| | पथे | पथिभ्याम् | पथिभ्यः |
| | पथः | पथिभ्याम् | पथिभ्यः |
| | पथः | पथोः | पथाम् |
| सप्तमीविभक्तिः | पथि | पथोः | पथिषु |

शस्प्रभृतिषु अजादिषु 'भस्य टेर्लोपः' इति टिलोपः

शस्प्रभृतिषु हलादिषु नलोपः

- एवं मन्थाः, ऋभुक्षाः ।
- मन्थदण्डवाची मथिन्-शब्दः ।
- पूर्णतया पथिन्-शब्दवत् ।

- इन्द्रवाची ऋभुक्षिन्-शब्दः ।
- अत्र थकाराभावात् 'थो न्थः' इति न प्रवर्तते ।
- शेषं पथिन्-शब्दवत् ।